National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(9): 78-82
© 2016 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# पञ्चतन्त्रे सत्त्वरजस्तमोगुणविश्लेषणं व्यक्तित्वविकासश्च

**आचार्यः जि. पद्मनाभम्**

**सारांशः (Summary)**

अस्मिन् शोधलेखे विष्णुशर्मणा विरचितस्य **'पञ्चतन्त्रस्य'** (विशेषतः मित्रभेदस्य) पात्राणां व्यक्तित्वं त्रिगुणाधारितं विश्लेषणं कृतम् अस्ति। लेखकः पञ्चतन्त्रस्य कथां केवलं नीतिशास्त्रत्वेन न अपितु **व्यक्तित्वविकासस्य (Personality Development)** साधनत्वेन पश्यति।

- **वर्धमानः (वणिक्):** रजोगुणप्रधानः अस्ति, यतः सः अर्थोपार्जनपरः अस्ति, परन्तु तस्मिन् सत्त्वगुणस्य प्रभावात् दया कृतज्ञता च दृश्यते।
- **दमनकः (शृगालः):** अयं तमोगुणप्रधानः पात्रः अस्ति। अस्य वचनानि यद्यपि स्वार्थपूर्णानि सन्ति, तथापि तेषु उक्ताः 'परोपकार' सम्बन्धिताः श्लोकाः व्यक्तित्वविकासाय प्रेरकाः सन्ति।
- **करटकः:** अयं सत्त्वगुणप्रधानः पात्रः, यः सन्तोषं नीतिपालनं च समर्थयति।
- **पिङ्गलकः (सिंहः):** अयं सत्त्वगुणसम्पन्नः अपि दुर्जनसंसर्गात् (दमनकप्रभावात्) तमोगुणेन ग्रस्तः भवति, यत् व्यक्तित्वविनाशस्य कारणं भवति।

भगवद्गीतायाः सन्दर्भैः सह अत्र एतत् सिद्धं क्रियते यत् कोऽपि व्यक्तिः केवलेन एकेन गुणेन न निर्मितः, अपितु गुणानां सम्मिश्रणेन एव तस्य स्वभावः जायते। अन्ते 'धैर्यं', 'उद्यमः', 'विवेकः' च व्यक्तित्वरक्षणस्य मुख्याः उपायाः इति निरूपितम्।

**कूटशब्दाः (Key Words) - त्रिगुणाः** (सत्त्व-रज-तमांसि), **व्यक्तित्वविकासः** (Personality Development), **मित्रभेदः** (पञ्चतन्त्रस्य प्रथमं तन्त्रम्), **सत्त्वगुणः** (ज्ञान-सुख-दयाप्रदः), **जोगुणः** (तृष्णा-कर्म-अधिकारपरः), **तमोगुणः** (अज्ञान-प्रमाद-नाशकः), **दमनक-नीतिः** (स्वार्थसिद्धिः भेदनीतिश्च), **धैर्यम्** (आपत्कालेऽपि अचलत्वम्), **पौरुषम्** (दैवं निहत्य उद्योगः), **दुर्जनसंसर्गः** (व्यक्तित्वविनाशस्य कारणम्)

### पञ्चतन्त्रे सुहृदभेदे सत्त्वगुणप्रधान व्यक्तित्वम्

पञ्चतन्त्रे मित्रभेदो राजसतामसगुणप्रधानः। किन्तु तत्रापि केचन श्लोकाः सात्त्विकगुणप्रधानाः केचन व्यक्तयस्सत्त्वगुणप्रकाशिताश्च दृश्यन्ते। वैराग्यं च सत्त्वगुणसम्पन्नस्यैव भवति न तद्वैराग्यं निर्वेदहेतुः। किन्तु क्वचित् धैर्यस्य सम्पादकमपि भवति।

### वर्धमानः रजोगुणप्रधानः

वर्धमानः प्रकृत्या वणिक् द्रव्यार्जनपरः इति रजोगुणप्रधानः। किन्तु सः कुत्रचित् सन्दर्भे दयावान् धैर्यवानिति वर्णितः । व्यापारार्थं प्रस्थितस्य तस्य वृषभो यदा भग्नस्तदा सपदि तं परित्यज्य न गतवान् केवलं वृषभमात्रकृते त्रीणि दिनानि तस्य वृषभस्य चिकित्सायां यापितवान् । यदाऽसौ न चिकित्सकः इति निश्चितवान् परैश्च गमनार्थं उक्तवान् तदैव सञ्जीवकमरण्ये त्यक्तुमनिच्छयाऽपि कृतनिश्चयः।

**न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः।**
**एतदेवात्र पाण्डित्यं यत्स्वल्पाद् भूरिरक्षणम्।।**[1]

तथापि सञ्जीवकस्य रक्षणार्थं पुरुषान् नियुज्यैव गतः। तेऽपि मिथ्यावादिनः । अतः सञ्जीवको मृतः इति कतिपयदिनानन्तरं तमूचुः। सञ्जीवकं मृतं श्रुत्वा अपि न केवलमश्रुपातमात्रकेन वर्धमानस्तं न

विस्मृतवान् ।

किन्तु यथाविधि वृषोत्सर्गादिकाः ऊर्ध्वदेहिकाः क्रियाः मृतमुद्दिश्य कृतवान्। केवलं कश्चित्कालसेवकस्य तिर्यगः कृते एवं विधां दयां कृतज्ञतां दर्शितवानिति वर्धमानारन्यो दयावान् कुत्रचित् न भवति। पशुषु अपि एवं कृतादरो मृतान् कथं पश्यतीति तस्य धार्मिकत्वं कृतज्ञत्वमर्थापत्यं निरूपयति । एवं दयाकृतज्ञत्वं च सत्त्वगुणानुकूल यदि सर्वेषा भवति तस्य व्यक्तित्वं सम्पूर्णतया विकसितं भवत्येव ।

**दमनकः तमोगुणप्रधानः**

दमनकः प्रकृत्या तमोगुणसम्पन्नः। तथापि करटकं स्वभीष्टराज-सेवाविषये व्यापरयितुं दमनकः स्वेन न आचरितः योग्यान्यपि बहनि उत्तमवाक्यान्युक्तवान्। दमनकविषये यद्यपि तानि अर्थवादरूपाणि तथापि पाठकैः आचरणे अनुष्ठितानि व्यक्तित्वविकासाय भवन्त्येव। सर्वदा नरेण परोपकारपरेण भाव्यमिति स्वार्थत्यागप्रतिपादकाः नवश्लोकाः सत्त्वगुणप्रोत्साहिकाः एव। तेषां तात्पर्य 'यस्य जीवनेन आश्रिताः बहवो जीवन्ति स एव सर्वोत्तमः' इति। लोकेषु प्रथितयशस्कः विज्ञानशौर्यादि गुणैः प्रसिद्धः स्वल्पप्रमाणमपि तस्यैव जीवितं धन्यम्।

यश्च स्वयमितरसाहाय्येन वा बन्धूनामाश्रितानां विषये दयां न कुरुते तस्य जीवितं निष्फलम्।

यथा स्वल्पेनापि पेयजलेन सरित् परोपयोगिनी भवति न तथा सुपूरः व्यर्थजलप्रवाहः।

यस्य श्रिया इतरे प्राप्तालम्बनाः भवन्ति तस्यैव सम्पत् सफला।

एवमर्थवादमात्रेष्वपि दमनकवाक्येषु व्यक्तित्वविकासहेतुः श्रेयस्करः उपदेशः दृश्यते । ते च श्लोकाः अत्र अधः उदाहृताः।

**यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु ।**
**वचांसि किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ।।**[2]

**यावज्जीव्येत् क्षणमपि प्रथितं मनुष्यै-**
**र्विज्ञानशौर्यविभवार्यगुणैः समेतम्।**
**तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः**
**काकोऽपि जीवति चिरज बलि च भुङ्क्ते ।।**[3]

**यो नात्मना न च परेण च बन्धुवर्गे**
**दीने दयां न कुरुते न च मर्त्यवर्गे।**
**किं तस्य जीवितफलं हि मनुष्यलोके**
**काकोऽपि जीवति चिरञ्च बलिं च मुङ्क्ते ।।**[4]

**सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः।**
**सुसंतुष्टः कापुरूषः स्वल्पकेनापि तुष्यति ।।**[5]

**जातस्य नदीतीरे तस्यापि तृणस्य जन्मसाफल्यम्।**
**यत् सलिलमज्जनाकुलजनहस्तालम्बनं भवति ।।**[6]

**करटकः सत्त्वगुणप्रधानः**

करटको दमनकवत् न तामसो राजसेवा विमुखः। विवादो यथा न जायते सुखं च यथा भवति तथैव जीवितं यापनीयमिति सो मनुते। यः पुमान् करटकवत् कालप्राप्तेन परितुष्टः सः सात्त्विकवृत्त्या सुखी भवति। यदा दमनको राजसेवार्थं लोभयितुं करटक्मुक्तवान् तदा करटको लब्धाहारेण सुखं जीवितं यापयति। किमस्माभिरेवं विध सेवावर्तनेनेति दमनकं वारितवानपि च अव्यापारेषु व्यापारो न कार्यः। स च प्राणापायहेतुरित्यपि निरूपयितुं कीलोत्पाटिनो वानरस्य कथामपि उक्तवान्। एवं करटकः क्वचित्सात्विक-व्यक्तित्वविकास-हेतुमुपदेशमपि करोति। कार्यकरणेऽपि सर्वत्र दमनकः एव अकार्यं करोति। करटकस्तु दमनकस्नेहवशेन केवलं तमनुसरति । सात्त्विकं व्यक्तिक्त्वमिच्छन् मनुष्यः केवलं करटकोपदिष्टं समाचरेत् न तु दुष्टमनुसरेत्।

**पिङ्गलकः सत्त्वगुणप्रधानः**

पिङ्गलकः प्रकृत्या सद्गुणवान्। किन्तु दष्टेन दमनकमन्त्रेण उपजापितः आश्रिते सन्जीवके अनार्यमाचरितवान्। सर्वदा दीनेषु दया कार्या। तुल्यबले यथावसर कोप कार्यमिति विश्वसिति। प्रथमं सञ्जीवकमधिकृत्य दमनकमुखात् श्रुतवान् तदा यद्यसौ विधेयस्तदा न वध्यः इति उक्तवान् । तदानीं पिङ्गलकवाक्यानि सत्त्वानुरूपं तस्य व्यक्तित्वं निरूपयन्ति।[7]

पिङ्गलको आह-'सत्यं दृष्टं भविष्यति भवता। न दीनोपरि महान्तः कुप्यन्तीति न त्वं तेन निपातितः । यतः –

**तृणानि नोन्मूलयति प्रभञ्जनो**
**मृदूनि नीचैः प्रणतानि सर्वतः।**
**स्वभाव एवोन्नतचेतसामयं**
**महान्महत्स्वेव करोति विक्रमम् ।।**[8]

अपि च -

**गण्डस्थलेषु मदवारिषु बद्धराग**
**मत्तभ्रमद्भ्रमरपादतलाहतोऽपि।**
**कोपं न गच्छति नितान्तबलोऽपि नाग**
**स्तुल्ये बले तु बलवान् परिकोपमेति ।।**[9]

पिङ्गलकः प्रकृत्या साधुः। अतस्साधुवर्तनेन सञ्जीवकेन गाढां मैत्रीं कृतवान्। किन्तु अयोग्ये विश्वासं कृत्वा तस्मिन् राज्यरक्षणभारं निवेशितवान्। करटकदमनक-निक्षिप्तराज्यभारत्वात् स नष्टः ।

इदमत्र व्यक्तित्वविकाससाधने कारणमूह्यम् यत् स्वयं बलवान, विज्ञानवान, लब्ध-योग्यसमागमस्तथापि प्रमादेनापि स्वकर्तव्यं परेषु न निक्षिपेत्। विशेषतः कपटवर्तिनी स्वभारं न विन्यस्येदिति । तथा कृत्वा प्रभ्रपि नष्टो भविष्यतीति। विशेषतः अधिकारिभिः खलाः अविश्वास्याश्च दरतो वर्जनीयाः। इयमेव नीतिः पुराणेष्वपि दृष्टा-

**न विश्वसेदविश्वसस्ते विश्वस्ते नातिविश्वसेत्।**
**विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ।।**[10]

पिङ्गलकः स्वकर्तव्यादेव प्रमत्तस्सञ्जीवकेन कृतातिमैत्रिभृत्यानपि न भृतवान्। एवं विधो दोषः केनापि न करणीयः इति पिङ्गलकवर्तनेन सूचितम्।

**बुभुक्षितः किं न करोति पापं**
**क्षीणा जनाः निष्करुणाः भवन्ति ।" इति।**[11]

पञ्चतन्त्रे एव अन्यत्र व्यक्तित्वनाशनहेतुः क्षुदिति स्पष्टमुत्पादितम्।

करटकदमनकयोः वृत्तेर्नाशादेव तौ सञ्जीवकाय दृह्यतः। अतः पिङ्गलको व्यक्तित्वविकासाय प्रत्युदाहरणं भवितुमर्हति। ये ये दोषाः पिङ्गलके दृष्टाः तान्परित्यज्य विद्वान् स्वव्यक्तित्वमभिवर्धयेदिति सूचितम्। पिङ्गलकेन कृतः प्रथमो दोषो दुर्जनसंसर्गः, व्यक्तित्वविकासेच्छुस्सदा दुर्जनात् दूरी भवेत्। दन्तिलगोरम्भकथायां दुर्जनहस्तगतः कोऽपि क्षेमेण न एघते इति स्पष्ठमुक्तम्।

**कोऽर्थान्प्राप्य न गर्वितः विषयिणः कस्यापदोस्तं गताः**

**स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः।**

**कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवं ?**

**को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ।।[12]**

कर्ण जपैः कृतमुपजाप कदापि न श्रुणुयात्। श्रुतेऽपि तत्र श्रद्धा न कुर्यात्। यतः उपजायः भ्रमरकीटन्यायेन धीमतामपि बुद्धि विकृता करोति ।

क्रोधस्सर्वथा त्याज्यः। अशक्तेन क्रोधत्यागः नात्रविवक्षितः। शक्तोऽपि यः क्षमां करोति स एव सुखी भवति।

**पूर्वे वयसि यः शान्तः स शान्तः इति मे मतिः।**

**धातुषु क्षीयमाणेषु शमः कस्य न जायते।।[13]**

पिङ्गलकोऽपि दमनकस्य वाक्यं श्रुत्वा सञ्जीवके जात कोपः सञ्जीवकोऽपि दमनकरय तन्त्रेणैव प्रणष्टः। अतः प्रथमं सूचकं दूरे स्थापयेत्। पिङ्गलकस्सञ्जीवकविषये दमनकेन यदुक्तं सत्यं न वेति क्षणं विचारयति। सञ्जीवकं वा स्वयमाह्य कृतं पृच्छति तदा महती आपन्निवारिता भवेदेव। यदि सञ्जीवकवधानन्तरं सत्यं पिङ्गलकेन ज्ञातं तदा यावज्जीवं तस्य पश्चात्तापात् मोक्षो न भवेदेव। इममर्थ स्वयमभ्यूहितवान्।

**एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता।**

**बुद्धिर्बुद्धिमता सृष्टा हन्ति राष्ट्र सनायकम् ।।[14]**

तदहं मायाप्रपञ्चेन गुप्तमाश्रित्य तं स्फोटयिष्यामि। करटको आह-'भद्र! यदि कथमपि तव मायाप्रवेशं पिङ्गलको ज्ञास्यति सञ्जीवको वा तदा नूनं विघात एव।

सञ्जीवको मृगाधिपत्याय यतते इति पिङ्गलकमुक्तवान्। एवं त्वां ज्ञात्वा स्वामी हन्तुमिच्छतीति सञ्जीवकमुक्तवान्। एवमन्योन्यकलहोत्पादनेन दमनकस्य कार्य सिद्धम्। सुहृद्भिः। सुहृद्भिः विरोधः कदापि न कार्यः। कृतेऽपि विरोधे सामञ्जस्यं प्रथमं चिन्तनीयम्।

बिलम्ब कृतेऽपि बलवता कालान्तरेण साध्यं भवति। सुत्सुकृतः अपचार पुन निवर्तयितु कोऽपि न शक्नोतीति सुहृदभेदेन तन्त्रेण सुचितम्। यदाहुः-

**चिरादपि बलात्कारः बलिनः सिद्धयेऽरिषु।**

**छन्दानुवृत्तिदुस्साध्याः सुहृदो विमनीकृताः ।।[15]**

**पञ्चतन्त्रे सुहृद्भेदे रजोगुणप्रधानं व्यक्तित्वम्**

आधुनिककाले बान्धव्यात् मैत्र्याः इतरमानवीयसम्बन्धेभ्यश्च धनस्याधिकारस्य च प्राधान्यं दृश्यते। पुराणेषु एवं विधा प्रवृत्तिः कलियुगप्रभावेण सञ्जातेति वदन्ति। किन्तु धनाशा, अधिकाराशा, कामाशा च पुराकालादेव अनुस्यूतो वर्तते। । श्रीमद्रामायणे श्रीरामः 'काम एव अर्थधर्माभ्यां गरीयानिति मे मतिः[16] इति स्वयं बदति। कामः कस्यचन वस्तुनः प्राप्तेरभिलाषः। स च क्वचिदधिकारविषयो भवति। क्वचित् द्रव्यविषयो भवति। क्वचित् स्त्रीविषयको भवति। अर्थाभिलाषः कामाभिलाषश्च सार्वकालिकी बुगभेदेन तयोः न्यूनाधिक्यं न्यायान्याय्यसाध्यत्वं च भवतु नाम। किन्तु प्रायशस्सर्वे अस्मिन् युगे काले च स्वार्थपरायणाः स्वार्थसम्पादनाय पापमपि कर्तुमुत्सहन्ते इति दमनकपात्रेण पञ्चतन्त्रे निरूपितम्। स च कामः प्रायशो रजोगुणेन वर्धते। तमोगुणोऽपि कामाभिवर्धकः। तमसः प्रवृत्तिः निन्द्या भवति। रजसः प्रवृत्तिः लौकिकसुखहेतुर्भवति। करटकदमनकयोवृत्तिः अत्र राजसी एव वर्णिता। किन्तु तमोगुणः तदा तदा रजोगुणे प्रविशति तदा कदाचित् राजसस्य पुरुषस्य तमोगुणानुकूलवृत्तिरपि भवतीति भगवद्गीतासु स्पष्टमुक्तम्। केवलम् एकेन गुणेन सृष्टिः कदापि न भवति गुणान्तरमिश्रितः एव अन्यो गुणस्सृष्टये कल्पते।

यथा ईषत् लोहान्तरमिश्रितमेव सुवर्णमाभरणार्थमुपयोज्यं शुद्धसुवर्ण तथा नोपयुज्यते एवं शाकादिषु पानीयादिष्वपि रसान्तरमिश्रमेण आस्वादवैचित्री जायते। भगवद्गीतासु गुणानां सम्मिश्रणमेव वर्णितम्।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।[17]**

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत।**

**रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।।[18]**

हे भारत ! सत्त्वगुणो रजस्तमसी च तिरस्कृत्य उद्भवति। तदा सत्त्वं ज्ञानसुखादि स्वकार्य करोति । यदा तु रजोगुणः सत्त्वं तमश्च तिरस्कृत्य उद्भवति । तदा रजोगुणः स्वकार्य कर्म तृष्णादि जनयति। तथा तमोगुणः (यदा) सत्त्वं रजश्च तिरस्कृत्य वर्धते। तदा तमोगुणः स्वकार्य ज्ञानाऽऽवरण-प्रमादादीन् जनयति इति गीता सम्यक् प्रबोधयति।

सुहृद्भेदेऽपि दमनकपात्रं रजोगुणप्रधानं पिङ्गलकादिषु सत्त्वगुणाधिक्यं रजोगुणमिश्रितं दमनके पुनः रजोगुणस्तमोमिश्रितः। सत्त्वेन मिश्रितो रजोगुणस्सुखाय भवति। तमोमिश्रितः अन्यायमार्गेण कार्यसाधकं भवति। दमनकस्स्वकार्यसिद्धिपर्यन्तं केवलरजोगुणमाश्रितवान्। यदा स्ववृतेर्भङ्गः उपस्थितस्तदा तस्मिन् तमोगुणो विवेश। तमसो न्यूनतायां केवलं स्वकार्यलाभस्तात्कालिको भवति तदाधिक्ये परविनाशो भवति। पिङ्गलको दमनकप्रभावेण अज्ञानी बभूव। अतस्तमोगुणप्रभावः पिङ्गलके पतितः। अन्यायवृत्त्या परविनाशाय कृत सङ्कल्पः, अतः पात्रत्रयेण व्यक्तित्वविकासकारणमेवमूह्यम्-

१. यावति राजसवृत्त्या स्वकार्यसिद्धिस्तावति न निषिद्धा।

२. स्वस्थितेः कदाचित् तमः आश्रयणीयः तथापि प्राधान्यं न देयम्।

३. अज्ञानेन तमोगुणे प्रवृत्तः परनाशायोपकल्पते।

इति दमनको यथा बोधयति तस्य पात्रं व्यक्तिविकासकारणं च यदा भवति तदालोचनीयम्।

दमनकस्सञ्जीवकं कस्मादपि हेतोर्भीतं दृष्ट्वा तस्मात्

स्वलाभस्सम्पादनीयः इति चिन्तयति। तावत् तस्य दोषो न विद्यते प्रागेव अयमनुभूतराज्याधिकारः। अतः पुनः केनापि उपायेन पुनः राज्ये स्थानं सम्पादयितुमिच्छति।। तावान् अधिकारस्साक्षात् राजानुग्रहेण विना न सिध्यति। राज्ञो भयमपनीय ततो लाभः प्राप्यः इति दमनकचिन्ता समञ्जस एव। स्वजन्मना सुहृद्भ्यः उपकारः कार्यमिति चिन्ता तस्य श्लाघनीया। प्रथमं करटको दमनकं तस्माद् व्यापारात् वारयति आवां राजकीयव्यापारेभ्यो दूरीभूतौ राज्ञः किं करौ वा। एवमल्पाभ्यामावाभ्यां महत्तत्कार्यं कथं भविष्यतीति। ततो दमनकः तद्वचनं निराकृत्यैवमाह 'केनापि प्राणिना केवलम् आत्मम्भरिणा उदरंभरिणा वा न भाव्यम्। जात्या, गुणेन, क्रियया वा किञ्चित्कार्यमसम्पादयतो जन्म केवलं संज्ञायै भवति। एवं विधमालोचनं सर्वेषां व्यक्तित्वविकासकारणमेव।

**यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु ।**
**वयांसि किं कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ।।**[19]

यस्य जीवनेन इतरेषामपि जीवनं दृतं भवति तस्य जीवितमेव धन्यम्। अन्यथा पक्षी अपि स्वसुखोपयोगेन स्वस्मै उदरं यथा बिभर्ति तदा सोऽपि अप्रयोजकः।

**अज्जीव्यते दक्षणमपि प्रथितं मनुष्यै**
**विज्ञानशौर्यविभवार्यगुणैः समेतम्।**
**तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञा**
**काकोऽपि जीवति चिरा बलि च भुङ्क्ते ।।**[20]

अल्पकालमपि जीवन् मनुष्यो विज्ञानेन पराक्रमेण सम्पदा पूज्येः गुणैः प्रसिद्धो भवति। तस्यैव जीवनं सफलमितरस्य जन्म चिरजीविनोऽपि काकजन्मेव निष्फलम्।

यश्च मनुष्यस्स्वयं स्वीयानामुपकारको न भवति परैस्तेषां सहायं कारयितुं शक्तोऽपि न करायति, दीनेषु दयां न कुरुते तस्य जीवितं निष्फलम्।

दमनकरस्वार्थाय करटकं प्रवर्तयितुं एवमुक्तवानपि सस्सत्यं वक्ति। एवं चिन्तया सर्वोऽपि मनुष्यः उत्तमव्यक्तिर्भवत्येव।

कृतविद्यत्वमन्यो व्यक्तित्वविकासहेतुर्महाभारते दृष्टोऽयं श्लोको दमनकेन अर्थात्

**सुवर्णपुष्यां पृथिवी छिन्वति पुरुषाः त्रयः।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।**[21]

यद्यपि दमनकस्सेवामुत्तमां वक्तुं पुनरपि तमिदं गृहीतवान् तथापि तत्सत्यमेव। पराक्रमशाली स्वयं धनार्जने प्रभवति। धनवान् परोपकारं कर्तुं प्रभवति। कृतविद्यः पण्डितः सोऽपि विद्याप्रधानेन परोपकारं कर्तुं प्रभवति। सेवकस्स्वार्थसाधने समर्थो भवति। शूरः कृतविद्यः ऐश्वर्यसाधक इति वचनेन व्यक्तित्वविकास साधनत्वं निरूपितम्। दमनकः करटकं राजनीतिमुपदिशन् वाग्मी प्रग्लभो भवति कार्यसाधकच भवतीत्युक्तवान् तदपि
व्यक्तेर्विकासहेतुरेव ।

प्राप्ते काले एवं वक्तव्यमेव वदेदित्यपि उपदेशो व्यक्तित्वाभिवृद्धये भवति।

**उत्तरादुत्तरं वाक्यं वदतां सम्प्रजायते।**
**सुवृष्टिगुणसम्पन्नाद् बीजाद् बीजमिवापरम् ।।**[22]
**अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन्।**
**लभते बह्ववज्ञानमपमानं च पुष्कलम् ।।**[23]

व्यक्तेर्विकासे संस्कारे वा कुलीनत्वमैश्वर्यं वा कारणं न भवति चेत् हेयादपि वस्तुनो विशिष्टानि उत्पद्यन्ते। पट्टवसनं कीटादुत्पद्यते। पर्वतखनेः पाषाणात् सुवर्णम् उत्पद्यते। गवां पित्ताशयात् सर्वोत्तममौषधमुत्पद्यते। एवं देशात् सर्पात् उत्तमो मणिर्भवति। सर्वोऽपि व्यक्तिस्स्वगुणैरेवादरणीयो न जन्मना न धनेनेति यः पश्यति सः उत्तमो व्यक्तिर्भवति ।

तद्यथा-

**कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वापि गोरोमतः**
**पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरगोमयात्।**
**काष्ठादग्निरहे फणादपि मणिर्गोपित्ततो रोचना**
**प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना।।**[24]

एवं दमनकस्य व्यापरो रजोगुणपूर्णोऽपि स्वाधिकारतृष्णय बोधितोऽपि अनुष्ठाने सर्वेशाचरणीययोग्यो दृश्यते। यदा सञ्जीवक-मैत्र्या दमनकः अधिकारात् त्याजितस्तदैव तस्मिन् तामसगुणप्रवृ-त्तिरभूत्। सञ्जीवकविषये बहून्यसत्यान्युक्तानि। मित्रभेदे बहवःश्लोकाः राजनीत्युपकारकाः। ये राजसेवकाः तेषां जागरणे व्यक्तित्वरक्षणे च ते भवन्ति उपकारकाः। किन्तु दमनकोक्ताया हसकच्छपकथाया दृष्टः कश्चनश्लोकः सदा व्यक्तित्वरक्षकः इति कथने न विमतम्।

**त्याज्यं न धैर्यं विधुरेऽपि काले**
**धैर्य्यात् कदाचिद्गतिमाप्नुयात् सः।**
**यथा समुद्रेऽपि च पोतभङ्गे**
**सांयात्रिको वाञ्छति तर्तुमेव ।।**[25]

अननुकूलेऽपि काले धैर्यं न त्याज्यं, मरणे अपरिहार्ये ततोऽपि अधिकः क्लेशः प्राणिनो न भवति। ततो धैर्यमवलम्ब्य यदि प्रतिक्रिया क्रियते कदाचित् प्राणरक्षा भवेत्। त्यक्ते धैर्ये मनोवैकल्यं भवति ततस्सर्वनाशः। यदि आत्मरक्षार्थं स्ववासस्थानं त्याज्यं तदा त्यक्तौ एव गच्छेत्।

**यास्यति सर्वत्र गतिः स कस्मात् स्वदेशरागेण हि याति नाशम् ।**
**तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरूषाः पिबन्ति ।।**[26]

मित्रसम्प्राप्तौ लघुपतनकेन वृत्तेः अलाभे देशत्यागे अपरिहार्ये हिरण्यकस्तं तथैव बोधयामास। एषो विषयस्तस्मिन् सन्दर्भ स्पष्टी करिष्यते। यश्च पुरुषस्सर्वं देवाधीनं मत्वा कार्यं न त्यजति सः आपदस्तरति तथा कृतविश्वासः एव क्रियाशीलो भवति। क्रियाशीलत्वेन जीवन संस्कार च प्राप्नोति । तत्र प्रमाणरूपेण भागवतात् गृहीत प्रह्लादवचनमुदाहृतम्।

अतः कष्टकालेऽपि उद्यमो न त्याज्यो दैवमनुसृत्य यत्नः कार्य एव इति निरूप्यतेऽत्र-

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः**
**दैवेन देयमिति कापुरुषा वदन्ति।**

**दैवं निहत्य कुरु पौरुषमात्मशक्तया**
**यत्ने कृत यदि न सिद्धयति कोऽत्र दोषः ।।[27]**

एष श्लोकः पञ्चतन्त्रे बहुषु स्थलेषु च दृश्यते। अन्ते करटको दमनकस्य अधिकाराशां निन्दति । किन्तु दमनकस्तयोः मैत्रिं पुर्नघटयितुं न शक्तः इति निश्चयोऽपि करटकेनोक्तः ।

**घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुम् ।**
**पातयितुमेव शक्तिर्नाखोरुद्धर्तुमन्नपिटकम् ।।[28]**

किन्तु दमनकस्तदानीं तामसवृत्तिः करटकस्य वाक्यं न श्रुतवान्। पिङ्गलकेन सञ्जीवकं घातयित्वा पुनः सात्त्विकः इव नीतिवचनानि पिङ्गलकमुक्तवान्। व्यक्तित्वविकासेच्छवो दमनकसदृशान् दूरे स्थापयेयुः। सात्त्विकानि वचनानि राजसेभ्यः श्रुत्वा अपि तेषु श्रद्धा न कार्या। योग्यवचांसि अन्यत्र विषये अनुष्ठाने ग्राह्याणि।

**उपसंहारः (Conclusion)**

अस्य लेखस्य मुख्यः निष्कर्षः अस्ति यत् **पञ्चतन्त्रम्** केवलं पशुपक्षणां कथाः न सन्ति, अपितु मानवानां आन्तरिकप्रवृत्तीनां दर्पणः अस्ति। यदि कश्चित् व्यक्तिः स्वस्य **सत्त्वगुणं** वर्धयितुम् इच्छति, तर्हि तेन दमनकसदृशानां खलानां सङ्गतिं त्यक्त्वा करटकसदृशं विवेकं धारणीयम्। पिङ्गलकस्य उदाहरणं शिक्षयति यत् 'कर्णजपैः' (चुगली करने वालों से) सावधानाः भवितव्यम्। एवं पञ्चतन्त्रस्य नीतयः आधुनिके काले अपि श्रेष्ठव्यक्तित्वनिर्माणाय अतीव उपयोगिन्यः सन्ति।

**सन्दर्भग्रन्थसूची (Bibliography)**


**१. पञ्चतन्त्रम् (पण्डित-विष्णुशर्म-विरचितम्):** सम्पादकः डॉ. रामचन्द्र-मिश्रः, प्रकाशकः चौखम्बा विद्याभवन, वाराणसी, उत्तर-प्रदेशः, प्रकाशनवर्षम् २००८.

**२. पञ्चतन्त्रम् (संस्कृत-हिन्दी-टीकासहितम्):** सम्पादकः पण्डित-ज्वालाप्रसाद-मिश्रः, प्रकाशकः खेमराज श्रीकृष्णदास प्रकाशन, मुम्बई, महाराष्ट्रम्, प्रकाशनवर्षम् २०१२.

**३. श्रीमद्भगवद्गीता (शाङ्करभाष्योपेता):** सम्पादकः पण्डित-दिवाकर-शर्मा, प्रकाशकः गीता प्रेस, गोरखपुर, उत्तर-प्रदेशः, प्रकाशनवर्षम् २०१५.

**४. श्रीमद्रामायणम् (वाल्मीकि-विरचितम्):** सम्पादकः श्रीनिवास-अय्यर-शर्मा, प्रकाशकः आर.एस. वाडयार एण्ड सन्स, बङ्गलूरु, कर्नाटकम्, प्रकाशनवर्षम् २००४.

**५. सांख्यकारिका (ईश्वरकृष्ण-विरचितम्):** सम्पादकः डॉ. गजानन-शास्त्री-मुसलगौंकरः, प्रकाशकः चौखम्बा संस्कृत संस्थान, वाराणसी, उत्तर-प्रदेशः, प्रकाशनवर्षम् १९९५.

**६. हितोपदेशः (नारायणपण्डित-विरचितः):** सम्पादकः कपिलादेव-गिरिः, प्रकाशकः चौखम्बा ओरियन्टालिया, वाराणसी, उत्तर-प्रदेशः, प्रकाशनवर्षम् २०१०.

**७. महाभारतम् (अनुशासन-भीष्मपर्वणी):** सम्पादकः पण्डित-रामचन्द्र-शास्त्री, प्रकाशकः गीता प्रेस, गोरखपुर, उत्तर-प्रदेशः, प्रकाशनवर्षम् २००२.

**८. संस्कृत-शब्दार्थ-कौस्तुभः:** लेखकः द्वारिकाप्रसाद चतुर्वेदी, प्रकाशकः रामनारायण लाल बेनीमाधव, प्रयागराज, उत्तर-प्रदेशः, प्रकाशनवर्षम् १९८०.

**९. शिवपुराणम्:** सम्पादकः पण्डित-पुष्पराज-शास्त्री, प्रकाशकः नाग प्रकाशक, दिल्ली, प्रकाशनवर्षम् १९९०.

**१०. नीतिशतकम् (भर्तृहरि-विरचितम्):** सम्पादकः डॉ. बाबूराम-त्रिपाठी, प्रकाशकः महालक्ष्मी प्रकाशन, आगरा, उत्तर-प्रदेशः, प्रकाशनवर्षम् २००६.


**पाद टिप्पणी**

[1]प.त.मि.भे., श्लो. १९,पृ.सं.१९
[2]प.त.मि.भे., श्लो. २३, पृ.सं.३१
[3]प.त.मि.भे., श्लो. २४,पृ.सं.३२
[4]प.त.मि.भे., श्लो. २५, पृ.सं.३२
[5]प.त.मि.भे., श्लो. २६, पृ.सं.३३
[6]प.त.मि.भे., श्लो. २९,पृ.सं.३४
[7]प.त.मि.भे., श्लो. १३४, पृ.सं.७०
[8]प.त.मि.भे., श्लो. ११३, पृ.सं.७०
[9]प.त.मि.भे., श्लो.१३५, पृ.सं.७०
[10]ह.व.प.,अ.२०, श्लो. १२३
[11]प.त.ल.प्र., श्लो. १६, पृ.सं.६३१
[12]प.त.मि.भे., श्लो. १५७,पृ.८४
[13]प.त.मि.भे., श्लो. १७६,५.९९
[14]प.त.मि.मे., श्लो. २१५,पृ.१२७
[15]शि.व., स.२, श्लो.१०५, पृ.सं.८२
[16]श्री.म.रा.,.स.५३,अयो.का., श्लो. ९.५.१९९
[17]श्री.म.भ.गी., अ.४, श्लो. ७
[18]श्री.म.भ.गी., अ.४, श्लो.१०
[19]त.मि.भे., श्लो. २३,पृ.२४
[20]प.त.मि.मे., श्लो. २४, पृ. २५.
[21]प.त.मि.मे., श्लो. ४६,१.४२
[22]प.त.मि.भे., श्लो.६४
[23]प.त.मि.भे., श्लो.६७
[24]प.त.मि.भे., श्लो. १०३,पृ.५४
[25]प.त.मि.भे., श्लो. ३४५,पृ.२२२
[26]प.त.मि.भे., श्लो. ३५१,पृ.२२७
[27]प.त.मि. भे., श्लो. ३९२,५.२५६
[28]प.त.मि.भे., श्लो. ४१३,पृ.२६८